International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2025; 2(5): 109-113
© 2025 IJMH
www.themultijournal.com
Received: 21-10-2025
Accepted: 26-10-2025
Publish : 28-10-2025

**Dr. PTG Ranga Ramanujacharyulu**
Assistant Professor,
Department of Agama,
National Sanskrit University,
Tirupati

**Correspondence:**
**Dr. PTG Ranga Ramanujacharyulu**
Assistant Professor,
Department of Agama,
National Sanskrit University,
Tirupati

# अत्रिप्रोक्ते समूर्तार्चनाधिकरणे अर्चनावैशिष्ट्यम्

**Dr. PTG Ranga Ramanujacharyulu**

**श्रीवेङ्कटाद्रिनिलयः कमलाकामुकः पुमान्।**
**अभङ्गुरविभूतिर्नः तरङ्गयतु मङ्गळम्॥**

वेदोऽखिलो धर्ममूलमित्युक्तरीत्या सर्वधर्मणां निदानभूतः ऋगादिभेदेन चतुर्विधो वेदः। वेदे तावत् भगवत्स्वरूपगुणविभूतयः न्यरूपयन्। तस्यैव निगम इत्यपरं नाम। निगमप्रतिद्वन्द्वि शब्दः आगमः लोके वरीवर्ति। आगमास्तावत् भगवतः अनुग्रहसिध्यर्थं क्रियमाणविधीनां बोधक इति पूर्वाचार्याः सङ्गिरन्ते। आगमो नामानादिसम्प्रदायसिद्ध -गुरुशिष्यपरम्परोपदेशक्रमागतः शास्त्रविशेष इत्यभिनव -देशिका श्रीमन्त उत्तमूरुवीरराघवाचार्याः लक्ष्मीतन्त्रग्रन्थस्योपोद्घाते उचुः।

आङ् इत्युपसर्गपूर्वक गम्ल्-गतौ इत्यस्माद्धातोः गृहवृदृनिश्चिगमश्च[1] इति पाणिनि सूत्रानुसारं अप् प्रत्यये आगमशब्दः निष्पन्नः। भगवदाराधनाबोधकं शास्त्रमित्यर्थः। आगम्येते प्रमीयेते हिताहित-प्राप्तिपरिहारौ इत्यागमः। एवं निश्चीयेत् नितरां आत्मतत्त्वं येनासौ आगम इत्यर्थः। आराध्यदेवतानु-सारमागमाः वैदिका-वैदिकभेदेन द्विविधम्। वैदिकाः वैष्णवशैवशाक्तभेदेन पुनः त्रिविधाः। वैष्णवागमः वैखानसपाञ्चरात्रभेदेन द्विविधः।

**<u>वैखानसागमः -</u>**

भगवान् महाविष्णुः विखनरूपेणावतीर्य शास्त्रमिदं उपदिदेश। तस्मादस्य वैखानसमिति व्यवहारः। वैखानसविजयग्रन्थे विशेषेण खननात् गभीराद्धोरणात् विशिष्टवैष्णवधर्मावधारणौपयिक -मीमांसन-विशेषाद् वैखानसमिति निर्वक्ति। तथैव खिलाधिकरे-

**नारायणः पिता यस्य माता चापि हरिप्रिया।**
**भृग्वादिमुनयः पुत्राः तस्मै विखनसे नमः॥[2]इति**

साक्षान्नारायणः विखनसमहर्षेः पिता। भगवान् विष्णुः विखनवदवततार इति न्यरूपि। भृगुप्रोक्ते क्रियाधिकारे श्रीमहाविष्णोराज्ञया ब्रह्मा विखनवदवतीर्य नैमिशारण्ये कल्पसूत्रेषु गृहार्चा, देवालयार्चा -विधानशास्त्रमनुगृह्य भृग्वत्रिमरीचिकश्यपेभ्यः शास्त्र-मुपदिष्टम्। तदुक्तम्-

**विखना इति वै विष्णुः तज्जा वैखानसाः स्मृताः।**
**विष्ण्वंशजश्च विखना मुनीनां प्रथमो मुनिः॥**
**ततो भगवता ज्ञप्तः सृष्ट्वा तावन्नसंख्यकान्।**
**अध्यापयामास तथा साङ्गोपाङ्गानि सर्वशः॥**[3] इति,

एवं- ब्रह्मा तु विखना मुनिःइति;

तत्रैव- **ततः परं चतुर्वक्त्रजटाकाषायदण्डभृत्।**
**नैमिशारण्यमासाद्य मुनिवृन्दनिषेवितम्॥**
**तपस्तप्त्वा चिरं ध्यायंस्तेजस्तु वैष्णवम्।**
**सश्रौतं च स सूत्रं च वेदमन्त्रैरभीप्सितम्।**
**संक्षिप्य सारमादाय शाणोल्लिखितरत्नवत्॥**
**धाता विखनसो नाम मरीच्यादिसुतान् मुनीन्।**
**अवबोधयदिदं शास्त्रं सार्धकोटिप्रमाणतः॥**[4] इति

वैखानसार्थे उक्तः। विखनमहर्षेः भृग्वादयश्शिष्याः। स्वशिष्येभ्यः भगवदाराधनं ज्ञानयोगक्रियाचर्यापाद -विषयान् उपदिदेश। भृगोः अधिकाराः अत्रेः तन्त्राणि, मरीचेः संहिता, काश्यपस्य काण्ड इति व्यवहारः। वैखानसे मरीचेः विमानार्चनाकल्पः, भृगोः क्रियाधिकारः खिलाधिकाराः, अत्रेः समूर्तार्चना-धिकरणम्, काश्यपस्य काश्य-पज्ञानकाण्डग्रन्थाः सुप्रसिद्धाः। वैखानसशब्दः प्राचीनसंस्कृतवाङ्मये वानप्रस्थाश्रमेत्युक्तम्। ब्रह्मचारी वेदमधीत्य गृहस्थाश्रमादपि वानप्रस्थाश्रमस्वीकरः योग्य इति विष्णुपुराण कथनम्। काळिदासेन अभिज्ञानशाकुन्तले वैखानसमुद्दिश्य-

**वैखानसं किमनया व्रतमाप्रदानात् व्यापाररोधिमदनस्य निषेवित-व्यम्। अत्यन्तमेवमदिरेक्षणवल्लभाभि अहो निवर्त्यति समं हरिणा-ङ्गनाभिः।।** [5] इति प्रोक्तम्।

वैखानसागमवैभवप्रतिपादनावसरे कुलार्णवतन्त्रे षष्ठेऽधयाये-

**अभिरूप्याञ्च बिम्बस्य पूजायाश्च विशेषतः।**
**साधकस्य विश्वासात् सन्निधौ देवता भवेत्।।**[6] इति

भगवच्छास्त्रविहितलक्षणलक्षितरामणीयकतारूपमेव बिम्बमिति, श्रौतसदृशप्रवर्तनाप्रतिष्ठापकः एवं पूर्वाचार्यपरम्परानुष्ठानदुरन्धरः भगवच्चरणारविन्दशरणागतितत्परः अर्चक इति, वर्णाश्रमधर्मविवे-काचरण- मेवार्चकस्य तपोयोगेति सर्वेषां सम्मेळलनमेवार्चास्व-रूपस्यावासः इत्यभिधीयते। पुनस्तत्रैव सप्तदशे अध्याये- **- अभीष्टफलदानाञ्च चतुर्वरगफलाश्रयात्।**

**वन्दनात् सर्वदेवानां अर्चनं समुदाहृतम्।।** [7]इत्यभ्यधायि।

एतादृशानां मूल्यांशानां बोधशास्त्रमेव वैखानसमित्युच्यते।तस्यैव भगवच्छास्त्रत्वंबोध्यते। विशिष्य बोधायनधर्मसूत्रेषु तृतीयभागे तृतीयेऽध्याये- शास्त्रपरिग्रहः सर्वेषां वैखानसानाम्[8] इति सूत्रव्या-ख्यान अवसरे तस्मादग्नौ नित्यहोमान्ते विष्णोः नित्यार्चा गृहे देवतायतने भक्त्या भगवन्तं नारायण-मर्चयेदिति वैखानशास्त्रस्यैव परिग्रहणं व्यधायि। अष्टादशपुराणेषु भागवतमहापुराणस्य वल्लभा-चार्याणां सुबोधिनी-व्याख्यायाम्- भगवदर्चनस्य वैखानसेन पथा वैदिकतान्त्रिकमिश्रभेदेन त्रिधा प्रोक्तम्। तत्र तवदाद्यं वैखानसमिति तदनु पाञ्चरात्रमिति अन्तिमं सकीर्तनानृत्यपरिमितमिति बोध्यते[9] इत्यभिहितम्। एवमेव वैखानसविद्वन्मणिः श्रीनिवासमखिः तात्पर्य-चिन्तामणिग्रन्थे-

**यज्वभिः यज्ञपुरुषो वासुदेवश्च सात्त्वतैः।**
**वेदानतवेदिभिर्विष्णुःप्रोच्यते यो नतोऽस्मि तम्।।**[10] इति

याज्ञिकाः यज्वा इति, सात्तवताः वासुदेवेति, वैदिकाः विष्णुरिति नाम्ना वदेवमर्चयन्तीति अवादीत्। अत्र वैदिकशब्देन वैखानसाः बोध्यन्ते। श्रीनिवासमखिः ये यज्वाः यज्ञरूपेण भगवन्तमाराधयन्ति ते अमूर्तार्चनपरा इति, एवं विग्रहरूपं श्रीमहाविष्णुमाराधयन्ति ते समूर्तभगवद्यजनपराः इत्यब्रवीत्। भृगुः खिलाधिकारे विंशेऽध्यये-

**साकारं च निराकारं भवत्याराधनं द्विधा।**
**प्रतिमाराधनं श्रेष्ठं साकारमभिधीयते।।**
**स्थण्डिले सलिल वापि हृदये सूर्यमण्डले।**
**आराधनं निराकारं तयोः साकारमुत्तमम्।।**
**संसाराश्रमनिष्ठानां पुरुषाणां विजानताम्।**
**इह चामुत्र च हितं यथेष्टफलदायकम्।।**
**सकलं सर्वसम्पूर्णं साकारमभिधीयते।**
**चक्षुषोः प्रीतिजननं मनसो हृदयस्य च।।**
**यथोपयोगशक्यत्वात् प्रतिमाराधनं परम्।**[11] इति

साकारनिराकारभेदेन अर्चनं द्विविधमिति तत्र निरकरार्चनं नाम स्थण्डिल हृदये सूर्यमण्डल वा भगवन्तं श्रीमहाविष्णुं संभाव्यार्चां कुर्यादिति, विग्रहे प्रतिमायां वा समाराधनं साकारमिति प्रपञ्चितम्। अतः याज्ञिकविधानेन यत्फलं लभ्यते तत्तुल्यं फलं तावदर्चनेनापि सिध्यत इत्यत्र नास्ति संशयलेशः। भृगुः क्रियाधिकारे - यथा यागशालायां पञ्चाग्निकुण्डानि भवेयुः तथैव देवायतनेपि पञ्चबेराणि विद्योतन्त इति यथा कर्मणा एकस्य कल्पिताः पञ्चवह्नयः यथा चैकशरीरस्य वायुपञ्चककल्पनं तथैवैकविमानस्य पञ्चबेराणि कल्प-येत्[12] इति प्रोवाच। एवं मरीचिः विमानार्चनाकल्पे- सुप्रसन्नं परमा-त्मानं नारायणं भक्त्या ध्यात्वा सश्रद्धं प्रपूज्य चाभिवन्द्य श्रुत्यनुकूलेन मार्गेण चतुर्वेदोद्भवैः मन्त्रैः तमर्चयन् श्रुतिभिरभिहितं शाश्वतमतीन्द्रियं परात्परं देवैरभिलक्ष्यं तद्विष्णोः परमं पदं गच्छेयुरिति अवोचत्।

**<u>अत्रेः वैभवम् -</u>**

भृग्वत्रिमरीचिकश्यपेषु अत्रिः विशिष्टतम इत्युच्यते। अयञ्च ब्रह्म-मानसपुत्रः, अयोनिजः भगवतः श्रीमन्नारायणस्यानुग्रहेण सञ्जातः। महाभारते आदिपर्वणि

**ब्रह्मणो मानसपुत्राः विदिताः पुण्यामहर्षयः।**
**मरीच्यत्रिरङ्गिरसः पुलस्त्यः पुलहः क्रतुः।**
**मरीचेः कश्यपः पुत्रःकश्यपात्तु इमाः प्रजाः।।**[13]इत्युक्तम्।

सोऽयं अत्रिमहर्षिः अनसूयामुद्वाह्य दत्तत्रेयः सोमः दूर्वास इति त्रीन् पुत्रानजनयत्। एवञ्चासौ भूतभविष्य-द्वर्तमानद्रष्टा, सूक्षात्पमेष्ठी-विशिष्टः, तपोध्यानादिषु श्रेष्ठः, ब्रह्मलोकप्रतिष्ठापकः, सर्वशक्ति-वरिष्ठः, सर्व- शास्त्रेषु श्रेष्ठः, सप्तमहर्षु उत्कृष्टश्चेति बोध्यते। वैखान-समन्त्रप्रश्ने- य अनसूयेशो निदधन्निरक्ष स्संसारवेदा -मुदितो ररक्ष। भूयादयं वंशकरोऽस्य वंशस्स्वाहा। य एष दिग्भ्यो ववृधेऽत्रिराजा। अस्मै तस्येदं जुहुतो रातु सोमं स्वाहा।[14]इति अत्रिमहर्षि सोमद्रव्यं हविर्द्रव्यं च स्वीकृत्य सर्वान् रक्षस्वेति विभिन्नमन्त्राः संदृश्यन्ते। अयं महर्षिः श्रीवेङ्कटाद्रिक्षेत्रं गत्वा तत्र श्रीनिवासं सुष्ठु प्रपूज्य भगवदर्चनाविषये सुप्ष्टमुपदिष्टवानिति प्रकीर्णाधिकारेपि प्रोक्तम्। यथा- मरीचिरमन्धरे विषणुमरचयामास केश्वम्।

**सर्वदेवोत्तमं देवं श्रीनिवासमत्रिरर्चयेत्।।**
**काश्यपो विष्णवधिष्ठान शुभक्षेत्रेऽप्यहं भृगुः।**[15] इति।

अत्रिमहर्षिणा पूर्वतन्त्रम्, विष्णुतन्त्रम्, उत्तरतन्त्रम्, महातन्त्रमिति तन्त्रचतुष्टयं अशीतिसहस्र-संख्यात्मक -ग्रन्थराशिं उपदिष्टवानिति ज्ञायते। एतेषु चतुर्षु तनत्रेषु अन्यतमे उत्तरतन्त्राख्ये अन्तर्भूतः समूर्तार्चना-धिकरणो नाम विशिष्टग्रन्थः।

**<u>समूर्तार्चनाधिकरणग्रन्थस्वरूपम् -</u>**

अस्मिन् ग्रन्थे (83)त्र्यशीति अध्यायाः विलसन्ति। पुनः अनुबन्ध-रूपेण नवाध्यायाः सन्ति। सर्वेपि श्लोकाः अनुष्टुब् छन्दोनिबद्धाश्च।

एवं क्रियपादविषयकोऽयं ग्रन्थः। सा च भगवद्बिम्बस्थापनवन्दन-रूपेण भवेदिति एवं संसारसागरसन्तरणोपाय-रूपेण उपदिदेशेति ज्ञायते। एवमेव अस्मिन् समूर्तार्चनाधिकरणे ग्रन्थे - 1 तः 17 अध्ययान्तं आलयनिर्माणविशेषाः,
18 तः 25 अध्यायान्तं विग्रहकल्पविशेषाः,
26 तः 39 अध्यायन्तं विग्रहप्रतिष्ठांशाः,
40 तः 48 अध्ययान्तं भगवदर्चनाविशेषाः,
49 तः 52 अध्यायान्तं स्नपनविशेषाः तद्भेदाश्च,
53 तः 64 अध्यायान्तं उत्सवादीनां विषयविवरणम्,
65 तः 80 अध्यायान्तं भूपरक्षा, प्रतिष्ठाविशेषाः, अर्चनस्नपनादिषु प्रायश्चित्त-
विशेषाः, विभिन्नार्चनाद्रव्याणां स्वरूपम्, कालभेद इत्येते विषयाः सुष्ठूपवर्णिताः।

अस्य ग्रन्थस्यावतरणविषयमवलोकयामश्चेत् अत्रमहर्षिः स्वीयाश्रमे ध्याननिमग्नो समासीन-स्सन् नैके ऋषयः समागत्य तं महर्षिं प्रणम्य हे ऋषिश्रेष्ठ! देवाधिदेवः कः? परमो धर्म कीदृशः? अभीष्ट-सिद्ध्यर्थं कं समर्चयेत्? कीदृशेन पथा वा समर्चयेदिति पप्रच्छुः। एतेषां चतुर्णां समाधानरूप एवायं समूर्तार्चनाधिकरणग्रन्थस्यावतार इति पण्डितैरभ्यधायि।

**40 तः 48 अध्यायान्तविशेषाः (अर्चानावैभवम्)**

सर्वेषां देवानां विष्णुर्नारायणः सर्वोत्तमः, स एव ब्रह्मा, स एव रुद्रशब्दवाच्यश्च, अयं अणोरणीयान् महतो महीयान्, एवं सर्वेश्वरत्वम्, सर्वाधारत्वम्, सर्वशेषित्वम्, सर्वकर्मसमाराध्यत्वम्, स्वज्ञानस्वेतर -समस्तद्रव्यशरीरित्वम्, अप्रकृतदिव्यमङ्गळविग्रहत्व-मित्यालक्षलक्षितः परमात्मा निखिलजगत्सृष्टिस्थिति -लयकारकः ज्ञानशत्क्यादिषाड्गुण्यपरिपूर्णश्चेति ग्रन्थेस्मिन् प्रथमाध्याये 1-15श्लोकेषु विवृताः। तादृश परमात्मनः सायुज्यसाकारसालोक्य-समीप्यादियोग्यता सिद्ध्यर्थं तं भक्तिश्रद्धैः समर्चयेत्। इदमर्चनं प्रधनतया अमूर्तं समूर्तमिति द्विविधम्। अमूर्तार्चनं नाम अग्न्याराधनम, समूर्तार्चनं नाम प्रतिमाराधनम्।

यथा- **अमूर्तेति समूर्तेति द्विविधा साऽर्चना मता।**
**अमूर्ताऽग्न्याहुतिः प्रोक्ता समूर्ता प्रतिमार्चना।।** [16] इति।

गृहे देवायतने श्रमन्नारायणः अवशयं नित्याराधयेदिति, उभयोः गृहालयार्चनयो अर्चनमेवोत्तमोत्तमं भवतीति, चतुर्वदसमन्वितं चतुर्वर्गफलप्रदमिति अत्रिमहर्षिणा साङ्गोपाङ्गमालयार्चाङ्गरूपा-निमान् आलय -निर्माणविग्रहकलपन-विग्रहप्रतिष्ठार्चना-स्नपन-उत्सव-प्रायश्चित्तानामुद्दिश्य स्वशिष्येभ्यः उपदेशं चकार।

देवालये यथाशास्त्रं ध्रुव-कौतुक-स्नपन-उत्सव-बलिबेराणां निर्मा-णात्परं नित्यनमित्तिकविशेषदिनेषु भगवतः नैकैः उपचारैः समर्च-येत्। इदमर्चनं ग्राम- पट्टण- नगरजनानां तुष्टिपुष्टिशुभप्रदायकं भवेत्। तत्र भगवदर्चनारथं विशिष्टलक्षणलक्षितः अर्चकः अत्यन्तमावश्यकः।

**अर्चकलक्षणानि –**

अर्चको एकः ऋत्वित् नित्यस्वाध्यायतत्परः, सुसामहितः, यज्ञयागादिषु दक्षः. नित्यानुष्ठानतत्परः, ब्रह्मचारी गृहस्थो वा वैखानसकल्पसूत्रप्रतिपादितप्रयोगज्ञश्च भवत्। यथा-

**ऋत्विगुक्तगुणैर्युक्तो नित्यस्वाध्यायसंयुतः।**
**अर्चकस्तु यथोक्तं तु प्रातः स्नात्वा विधानतः।।**
**प्राणानायम्य सावित्रीं जप्त्वा स्वाध्यायमुच्चरन्।**
**कल्पमन्त्रविशेषज्ञो वैष्णवः सुसमाहितः।।**
**गृहस्थो ब्रह्मचारी वा भक्त्यैवार्चनमाचरेत्।**[17]इति।

अर्चकः भगवद्ज्ञानतत्परस्सन् सत्तवादिगुणयुक्तेन लोककल्याणा-र्थमालयं प्रविश्य भगवदाराधने प्रयतेत। आदौ द्वारपालान् प्रणम्य कवाटमुद्घाट्य भगवन्तमापादमौळयन्तं भक्त्या समवेक्ष्य विभिन्न-मन्त्रैः समाराधयेत्। यथा -ब्रह्म ब्रह्म इतिमन्त्रेण हृदयाभिमर्शनम्,
शं नो वातेति जपः, अन्तरस्मिन्निम इति ध्यानम्,
सोमं राजानमिति जलसंग्रहणम्,
धारासु सप्तेति उत्प्लावनम्,
इदमापश्शेविति अभिमन्त्रणम्,
अहमेवति निर्माल्यशोधनम्,
नारायणाय विद्महेति पुष्पाणां समर्पणम्,
भूः प्रपद्येति प्रणामः,
प्रतद्विष्णुस्तवते वीर्यायेति बिम्बस्थापनम्,
परिलिखित, वारीश्च तस्त्र, नमो वरुण, भूरनिलय, इषेत्वोर्जेत्वा इत्यादिमन्त्रैः स्नपनम्,
भूरसि भूः इति वस्त्रोत्तरीयभूषणादिसमर्पणम्,
यतो भूतानीति मन्त्रेण बलिप्रदानम्,
इदं विष्णुर्विचक्रमेति आवाहनम्,
प्रतद्विषणुस्तवतेति आसनोपचारः
विश्वाधिकानामिति स्वागतम्,
इन्द्रो अभिमन्तेति पाद्योपचारः,
शं नो दवी, आपो हिष्टेति आचनम्,
इमाः सुमनस इति पुष्पैः पूजनम्,
तद्विप्रास इमे गन्धा इति चन्दनादिसुगन्धलेपनम्
बृहस्पतिरिति धूपः
विष्णोः कर्माणि, शुभ्रा ज्योतिरिति दीपसन्दर्शनम्,

अग्निरिन्द्रा, त्रिर्देव, इन्द्रियाणि, हिरण्यगर्भ, इदमापः शिवा, नारा-यणाय विद्महे इत्यादिमन्त्रैः अर्घ्यसमर्पणम्, एवं तत्तन्मन्त्रैः सर्वेषा-मपि चतुष्षष्ट्युपचाराणां समाचरणमरचको भक्तिश्रद्धैः निर्वहेदिति समूर्तार्चनाधिकरणे सुस्पष्टं व्यवृणोत्।

**उपचाराणां विशेषाः –**

अत्रिमहर्षिः समूर्तार्चनाधिकरणे त्रिचत्वारिंशेऽध्याये उपचाराङ्ग-भूतमर्चनं यथाशक्ति अष्टधा विराजत इत्यवोचत्। यथा- एकोपचारः नामः प्रणामाञ्जलिः,
द्वौ उपचारौ नाम पुष्पसमर्पणम्, प्रणामाञ्जलिश्च
षडुपचाराः – पुष्प-गन्ध-धूप-दीप-अर्घ्य–आचमनानि
अष्टोपचाराः- पाद्य-आचमन-पुष्प-गन्ध-धूप-दीप-अर्ध्य-आचमनानि
एकादशोपचाराः - आसन-स्वागत-अनुमान-पाद्य-आचमन- पुष्प-गन्ध-धूप-दीप-अर्घ्य–आचमनानि
सप्तविंशत्युपचाराः- आसन-स्वागत-अनुमान-पाद्य-आचमन- पुष्प-गन्ध-धूप-दीप –अर्घ्य–आचमन-स्नान-प्लोत-वस्तत्र-उत्तरीय-भूषण-यज्ञोपवीत पाद्य-आचमन- पुष्प-गन्ध-धूप-दीप –आचमन-हविः-पानीयाच।
नवविंशत्युपचाराः- आसन-स्वागत-अनुमान-पाद्य-आचमन- पुष्प-गन्ध-धूप-दीप–अर्घ्य–आचमन-स्नान-प्लोत-वस्तत्र-उत्तरीय-भूषण-

यज्ञोपवीत-पाद्य-आचमन-पुष्प-गन्ध-धूप-दीप–आचमन-हविः-पानीय-आचमन -मुखवासः-बलिश्च।

द्वात्रिंशदुपाचाराः-आसन-स्वागत-अनुमान-पाद्य-आचमन- पुष्प-गन्ध-धूप-दीप –अर्घ्य–आचमन-स्नान-

प्लोत-वस्तत्र-उत्तरीय-भूषण-यज्ञोपवीत-पाद्य-आचमन-पुष्प-गन्ध-धूप-दीप–आचमन-हविः-पानीय-आचमन-मुखवासः-बलिः-प्रणामः-स्तुतिः-पुष्पाञ्जलिश्च।

**पञ्चप्रणामाः-**

अत्रिमहर्षिः समूर्तार्चनाधिकरणे त्रिचत्वारिंशेऽध्याये मस्तिष्क-सम्पुट-प्रह्वाङ्ग-पञ्चाङ्ग-(अष्टाङ्ग) दण्डाङ्गाश्चेति पञ्चविधप्रणा-माः कथयामास। यथा-

**द्वात्रिंशद्विग्रहं चापि कुर्यात्तत्रव बुद्धिमान्।**
**तं देवं मनसा ध्यात्वा स्वमूर्धन्यञ्जलिं न्यसेत्।।**
**मस्तिष्कमिति विज्ञेयो हृदयेऽञ्जलिसम्पुटः।**
**संन्यसेत्तत्प्रणामस्तु सम्पुटः समुदाहृतः।।**
**साञ्जलिर्नतकायस्य परह्वाङ्ग इति गीयते।**
**पाणिं व्यत्यस्य बध्वैव स्वस्तिबन्धनमेव वा।।**
**पादाङ्गुळिभ्यां जानूभ्यां ललाटेनावनिं स्पृशेत्।**
**पञ्चाङ्ग इति विज्ञेयः पञ्चाङ्गैः करणादधः।।**
**अञ्जलिं संप्रसार्यैव सम्यग् ध्यानपरायणः।**
**भूम्यां च दण्डवच्छेते प्रणामो दण्ड उच्यते।।**[18] इति।

**पुष्पभेदाः -**

समूर्तार्चनाधिकरणे चतुश्चत्वारिंशेऽध्याये भगवदर्चनायां समुपयु-ज्यमानानां विभिन्नपुष्णामुद्दिश्य महर्षिः सविवरणं प्रोवाच। भगवदर्चने पुष्पाणां स्थानमति मुख्यतमं भवति। विशिष्य तुलसीदळं सर्वोत्कृष्ट -मिति कथ्यमाने सत्यपि भगवतः समर्प्यमाणं पुष्पविशेषं तु प्रधानतया दैविक-आसुर-राक्षस-याक्षिक-गान्धर्व-भूत-पैशाच-ब्रह्मभेदन अष्टधा न्यरूपि।

तत्र बिल्व-करवीर-पद्म-कुमदजातयः पुष्पाणि दैविकानि, उत्पा-टनद्वारा बहिरातानि पुष्पाणि आसुराणि, कण्टकयुतानां वृक्षाणां पुष्पाणि राक्षसानि,छिन्नानि,भिन्नमस्तिष्कानि पुष्पाणि याक्षिकाणि, एकरात्रोषितानि पुष्पाणि गान्धर्वाणि, गृहीतपरिशीर्णपुष्पाणि भूतपुष्पाणि, कुसुभादीनि पुष्पाणि पैशाचानि, सुपात्रे स्थितानि पुष्पाणि ब्राह्मपुष्पणीति भेदाः विवृताः। दैविकब्राह्मिकपुष्पाण्येव ग्राह्याणि। इतराणि त्याज्यानीति बोध्यम्। एवमेव श्वेतानि शान्तिदायकानि,पीतानि पुष्टिदायकानि, रक्तानि विद्वेष-कराणि, कृष्णानि वशकरणानीति समूर्चर्चनाधिकरणे विवृतम्। यथोक्तम्-

**श्वेतं शान्तिकरं ज्ञेयं पीतं यत्पौष्टिकं तथा।**
**रक्तं विद्वेषणं प्रोक्तं कृष्णं सर्ववशीकरम्।।**[19] इति।

एवमेव मल्लिका-मालती-जाती-दूर्वा-अङ्कुर-तृण-अतसी-द्विकर्णी-बहुकर्णी-श्वेतक-नन्दक-पुन्नाग-अर्जुनक-नन्द्यावर्त-अग्निकर्णिका-चम्प-क-अशोक-वकुळ-जातीपुष्प-तिन्दुक-कनक-कल्हार-धातकी-नन्द इ-त्यादीनि सर्वाद अर्चनार्हाणीति जगाद।

अयोग्येषु दोषभूमि-श्मशनपार्श्व-चण्डालवाटिकासीपस्थपुष्पाणि, एवं भगन्-उत्पाटित-छिन्न-सलेपक-शीर्ण-गैरिक-अजिक-गजिकैस्सं-युक्तपुष्पाणि सर्वदा सर्वथा त्याज्यानीति ग्राह्याणि। सर्वेषां पुष्पविधानं मुख्यतया विमानार्चनाकल्पे 43पटले, काश्यपज्ञानकाण्डे 72अध्याये, क्रियाधिकार 10 अध्याये, खिलाधिकारे 33 अध्याये, वासाधिकारे 27 अध्याये च सुष्टूपवर्णितम्।

**अर्चनाभेदाः -**

भगवतः विष्णोः क्रियमाणमर्चनं मुख्यतया उत्तमोत्तम-उत्तममध्यम-उत्तमाधम- मध्यमोत्तम-मध्यममध्यम-मध्यमाधम-अधमोत्तम-अधम-मध्यम-अधमाधमश्चेति नवधा प्रकीर्तितम्। एत सर्वेऽप्यंशाः समूर्तार्चनाधिकरणे सुष्टूपवर्णिताः।

प्रथमं चतुष्कालेषु समर्चनम्, त्रिकालेषु अन्नबलिः, मूर्तिहोमः, विशेषदिनेषु स्नपनम्, वीथ्युत्सवाः, असंख्यायकदीपैरर्चनं उत्तमो-त्तममिति उच्यते।

द्वितीयं चतुष्कालेषु समर्चनम्, त्रिकालेषु अन्नबलिः, मूर्तिहोमः, विष्णुपञ्चकदिनेषु स्नपनम्, वीथ्युत्सवाः, 236 दीपैरर्चनं उत्तम-मध्यममिति उच्यते।

तृतीयं चतुष्कालेषु समर्चनम्, त्रिकालेषु अन्नबलिः, मूर्तिहोमः द्वादश्यां श्रवणा -नक्षत्रे च दिनेषु स्नपनम्, 128 दीपैरर्चनं उत्तमा-धममिति उच्यते।

चतुर्थं चतुष्कालेषु समर्चनम्, प्रातः माध्याह्ने चान्नबलिः, मध्याह्ने होमः, रात्रौ अर्घ्यबलिः, 64 दीपैरर्चनं मध्यमोत्तममिति उच्यते।

पञ्चमं चतुष्कालेषु समर्चनम्, देव्योः त्रिकालार्चनम्, प्रातः माध्याह्ने च मूर्तिहोमः, रात्रौ अर्घ्यबलिः, 64 दीपैरर्चनं मध्यममध्यममिति उच्यते।

षष्ठं चतुष्कालेषु समर्चनम्, माध्याह्ने मूर्तिहोमः, अन्नबलिः, 32दीपैरर्चनं मध्यमाधमम्।

सप्तमं प्रातर्माध्याह्नयोः द्वाविशदुपचारैः समर्चनम्, मूर्तिहोमः, 16 दीपैः समर्चनं अधमोत्तममिति,

अष्टमं मुखवासान्तैः उपचारैः प्रातर्माध्याह्नयोः भगवतः विष्णोः समर्चनम्, रात्रौ

आचमनान्तैरुपचारैः पूजा षट् दीपैः नीराजनञ्चाधममध्यम-मिति,नवमं आचमनान्तैः उपचारैः प्रातः मध्याह्नकाले समर्चनम्, मुखवासान्तैः उपचारः मध्याह्नकाले पूजा, अर्घ्यामनान्तैः उपचारैः रात्रौ प्रपूजा चत्वारिदीपैः भगवतः नीराजनमित्यादि अधमाध-ममर्चनमिति विज्ञेयम्। अन्ते चैत्रादिद्वादशमासेषु नित्यार्चनेन सह नैमित्तिकार्चनमपि वैखानसग्रन्थेषु व्याख्यास्यन्ते।

## Bibliography


1. क्रियाधिकारः – आचार्य एस्.बि. रघुनाथाचार्य ति.ति.दे. तिरु-पतिः 1982
2. महाभारतम्(आदिपर्वः)- गीताप्रेस् – गोरखपुरम् -2000
3. वैखानसमन्त्रप्रश्नः-
4. प्रकीर्णाधिकारः- आचार्य पार्थसारथिभट्टाचार्यः– तिरुमलतिरुप-तिदेवस्थानम् – तिरुपतिः- 1973
5. कुलार्णवतन्त्रम्- श्रीजान्वुड्राफी, एम्.पि.पण्डित् गणेश् अण्ड्. को.प्रै.लि. मद्रास् 1965
6. अष्टाध्यायी- चैखम्बा संस्कृतसंस्थानम्- वाराणसी- 2001

7. सुबोधिनी-(वल्लभाचार्यव्याख्या) – आचार्य बलदेवोपाध्यायः- मुम्बई- 1973
8. तात्पर्यचिन्तामणिः – डा. आर्- कृष्णमाचार्यः- कुम्भकोणम्- 1982
9. खिलाधिकारः- आर्.पार्थसारथिभट्टाचार्याः तिरुमल तिरुपति देवस्थानानि तिरुपतिः 1961
10. समूर्तार्चनाधिकरणम्- आचार्य पार्थसारथिभट्टाचार्यः – तिरुमलतिरुपतिदेवस्थानम् – तिरुपतिः- 1988
11. अभिज्ञानशाकुन्तलम- चैखम्बा संस्कृतसंस्थानम्- वाराणसी- 1965

**सन्दर्भ**

[1] अष्टाध्यायी3.3.46

[2] खिलाधिकारः पृ. 16

[3] क्रिया. 38.28-29, विमानार्चनकल्प. उपो. पृ. 6

[4] क्रिया. उ. 6-7

[5] अ.शा.पृ. 19.44

[6] . कुलार्वणतन्त्रम् 6.76

[7] . कुलार्णवतन्त्रम्-17.71

[8] बोधा.ध.सू.3.3.17

[9] . सुबोधिनी-वल्लभाचार्या व्याख्या

[10] तात्पर्यचिन्तामणिः- 1.11

[11] खिलाधिकारः 20. 16-23

[12] क्रियाधिकारः 9.7-8

[13] महा.भा. आदि.65. 10-11

[14] वैखानसमन्त्रप्रश्नः- 6.9.30,31

[15] प्रकीर्णाधिकारः 35.9-10

[16] समू.1.28

[17] समू.40.6-8

[18] समू.43. 19-23

[19] समू.44.10